हिमसंस्कृतवार्ताः

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-274 | 1 | अगस्त 01, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लाष्टमी
श्रावण 17 प्रविष्ठांशः मङ्गलमयः भवेत्

2 केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानः सितम्बरमासे हिमाचलम् आगमिष्यति शिक्षामंत्री रोहितठाकुरः आमन्त्रितवान्

3 हि.प्र.मन्त्रिमण्डलस्य निर्णयाः- मानसूनसत्रस्य तिथयः निर्धारिताः, आशा कार्यकर्तृणां २९० पदानि पूरयितुं अनुमोदनम्,

4 संस्कृतसप्ताहस्य उपलक्ष्ये सूरतनगरे त्रिदिवसीयं योजनासमित्याः गोष्ठी जाता

## सुभाषितम्

**विदेशेषु धनं विद्या,**
**व्यसनेषु धनं मतिः।**
**परलोके धनं धर्मः,**
**शीलं सर्वत्र वै धनम्॥**

अर्थात्- विदेश में रहने के लिए विद्या ही धन है, व्यसनी व्यक्ति के लिए चातुर्य ही धन है, परलोक की कामना करने वाले के लिए धर्म ही धन हैं किन्तु शील (सदाचार) सर्वत्र (समस्त स्थानों के लिए) ही धन है।

## केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्री-किसान-सम्पदा-योजनायाः कृते विंशत्यधिकपञ्चशतोत्तर-षड्सहस्रकोटि-रूप्यकाणां परिव्ययस्य अनुमोदनं कृतम्



हिमसंस्कृतवार्ताः - केन्द्रीयमन्त्रिमण्डलेन पञ्चदशतमस्य वित्तायोगचक्रस्य कालखण्डे प्रचलितायाः "प्रधानमन्त्री किसान-संपदा-योजना" इति केन्द्रीयक्षेत्रयोजनायाः कृते विंशत्यधिक-नवशतोत्तरैक-सहस्रकोटिरूप्यकाणां अतिरिक्तव्ययेन सह विंशत्यधिकपञ्चशतोत्तर-षड्सहस्रकोटि-रूप्यकाणां परिव्ययस्य अनुमोदनं कृतम् अस्ति। सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, एकीकृतशीत-शृङ्खला तथा मूल्यवर्धन-अवसंरचनायाः अन्तर्गतं पञ्चाशत् बहूत्पादखाद्य-विकिरण-घटकानां स्थापनार्थं एकसहस्रकोटिरूप्यकाणां साहाय्यम् अनुमोदितम् अस्ति ।

## एन्.आई.ए. इति विशिष्ट-न्यायालयेन अष्टाधिक-द्विसहस्रतमाब्दे मालेगाँव-विस्फोट-प्रकरणे सर्वे सप्त अभियुक्ताः दोषमुक्ताः कृताः



हिमसंस्कृतवार्ताः - मुम्बय्याः एन्.आई.ए. इति विशिष्ट-न्यायालयेन अष्टाधिक-द्विसहस्रतमाब्दे मालेगाँव-विस्फोट-प्रकरणे भाजपा-दलस्य पूर्वसदस्या प्रज्ञा-सिंह ठाकुरः, लेफ्टिनेंट-कर्नल प्रसाद-पुरोहितः अन्ये च सर्वे सप्त अभियुक्ताः दोषमुक्ताः कृताः । एन्. आई ए इति विशिष्ट-न्यायालयः स्वकीये निर्णये अवदत् यत् अभियोजनपक्षः "प्रकरणं निरूपयितुं असफलः अभवत्" तथा च अभियुक्ताः "संशयस्य लाभाय योग्याः" सन्ति । न्यायालयः अवदत् यत् (यू. ए. पी. ए.) इति असंवैधानिक-क्रियाकलाप-निवारण-अधिनियमस्य उपबन्धाः अस्मिन् प्रकरणे न उपयुज्यन्ते । न्यायालयेन महाराष्ट्र-सर्वकाराय अपि निर्देशः दत्तः यत् मृतानां प्रत्येकस्मै परिवाराय द्वि-लक्षरूप्यकाणां क्षतिपूर्ति-राशिः प्रदातव्या अपि च घटनायां व्रणितेभ्यः पञ्चाशत-सहस्र-रूप्यकाणां क्षतिपूर्ति-राशिः दातव्या । अवधेयं यत् अष्टाधिक-द्विसहस्रतमाब्दे सितम्बर-मासस्य नवविंशति-दिनाङ्के मालेगाँव इत्यत्र मस्जिदस्य समीपे मोटरसाईकिल-यानेन बद्धस्य विस्फोटक-यन्त्रस्य विस्फोटनेन षट् जनाः मारिताः, पञ्चनवति-जनाः च व्रणिताः अभवन् । वार्ताहरैः सह वार्ता कुर्वन् अभियुक्तस्य अधिवक्ता रञ्जीत-नायरः इत्यसौ अवदत् यत् अभियोजनपक्षः अभियुक्तस्य विरुद्धं आरोपाणां निरूपणे असफलः अभवत् ।

## फिलिपिन्स देशस्य राष्ट्रपतिः अगस्तमासस्य चतुर्थदिनाङ्कात् भारतस्य पञ्चदिवसीयायां राजकीययात्रायां भविष्यति

हिमसंस्कृतवार्ताः - फिलिपिन्स देशस्य राष्ट्रपतिः फर्डिनेण्ड् आर मार्कोस् इत्येषः अगस्तमासस्य चतुर्थदिनाङ्कात् भारतस्य पञ्चदिवसीयायां राजकीययात्रायां भविष्यति। मार्कोस् इत्यनेन सह फिलिपीन्स देशस्य प्रथममहिला लुईस्-अरनेटा-मार्कोस्, तथा च उच्चस्तरीय-प्रतिनिधिमण्डलम् अपि आगमिष्यति यस्मिन् मन्त्रिमण्डलस्य अनेके मन्त्रिणः वरिष्ठाधिकारिणः च भविष्यन्ति। यात्रावधौ फिलिपिन्स् देशस्य राष्ट्रपतिः मार्कोस् इत्येषः प्रधानमन्त्री नरेन्द्रमोदी च अगस्तमासस्य पञ्चमे दिनाङ्के द्विपक्षीयोपवेशनं करिष्यतः। श्रीमार्कोसः राष्ट्रपतिपदासीनया द्रौपदीमुर्मु-वर्यया सहापि मेलनं विधास्यति । यात्रावधौ विदेशमन्त्री डॉ. एस. जयशंकरः राष्ट्रपतिमार्कोस् इत्यनेन सह मिलिष्यति। श्रीमार्कोसः बेङ्गलूरुनगरं अपि गमिष्यति, तत्पश्चात् अगस्तमासस्य अष्टमे दिनाङ्के स्वकीयदेशं प्रति गमिष्यति।

## उपसेनाध्यक्षः लेफ्टिनेंट जनरल् एन्. एस्. राजा-सुब्रमणि स्वकीयात् पदात् सेवानिवृत्तः अभवत्

हिमसंस्कृतवार्ताः - उपसेनाध्यक्षः लेफ्टिनेंट जनरल् एन्. एस्. राजा-सुब्रमणि स्वकीयात् पदात् सेवानिवृत्तः अभवत्। सेवावसानं प्राप्य, सः ऊनत्रिंशत-वर्षाणि यावत् विस्तृतं सुप्रसिद्धं सैन्यजीवनं चिह्नितम् अकरोत् । सैन्य-गणवेशे श्री सुब्रह्मण्यस्य विशिष्टयात्रा राष्ट्रिय-रक्षा-अकादम्यां आरब्धा, सः पञ्चाशीत्यधिकैकशत-तमे वर्षे दिसम्बर-मासे द-गढ़वाल रैफल्स् इत्यस्मिन् नियुक्तः अभवत् ।

## बिहारे मतदातृ-सूच्याः विशिष्ट-गहन संशोधने चर्चायाः याचनाम् अधिकृत्य विपक्षिदलानां विरोध-प्रदर्शनानन्तरम् द्वयोः सदनयोः कार्याचरणस्य स्थगनं बहुवारं सञ्जातम्



हिमसंस्कृतवार्ताः - बिहारे मतदातृ-सूच्याः विशिष्ट-गहन संशोधने चर्चायाः याचनाम् अधिकृत्य विपक्षिदलानां विरोध-प्रदर्शनानन्तरम् द्वयोः सदनयोः कार्याचरणस्य स्थगनं बहुवारं सञ्जातम् । लोकसभा द्विवारं राज्यसभा च त्रिवारं स्थगिते जाते, अन्ते च एते पूर्णदिवसाय स्थगिते । द्वितीयस्थगनानन्तरं यदा लोकसभायाः उपवेशनं सायं चतुर्वादने अभवत् तदा केंद्रीय-वाणिज्योद्योग-मंत्री पीयूष गोयलः अकथयत् यत् सर्वकारः भारतीय-वस्तुसु अमेरिकया प्रख्यापितस्य पञ्चविंशति-प्रतिशन्मितस्य शुल्कस्य प्रभावस्य आकलनं करोति । सः प्रोक्तवान् यत् देशः राष्ट्रीयहितानां रक्षायै सर्वानपि आवश्यकान् पदक्षेपान् उत्थापयिष्यति सहैव कृषकैः, उद्यमिभिः, उद्योगनिकायैः सर्वैः हितधारकैः च सह परामर्शं करिष्यति । श्रीगोयलस्य वक्तव्यानन्तरम् अपि विरोध-प्रदर्शनानि उद्दिश्य सदनं पूर्णदिवसाय स्थगितम् अभवत् ।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## प्रधानमन्त्री-किसान-सम्मान-निधि इत्यस्याः योजनायाः विंशतितमा निधिः कृषकेभ्यः प्रदास्यते

हिमसंस्कृतवार्ताः - प्रधानमन्त्री-किसान-सम्मान-निधि इत्यस्याः योजनायाः विंशतितमा निधिः कृषकेभ्यः शनिवासरे प्रदास्यते । अस्मिन् विषये कृषि-कृषक-कल्याण-मन्त्रिणः शिवराज-सिंह-चौहानस्य आध्यक्षे नवदेहल्याम् उच्च-स्तरीयोपवेशनम् अभवत्। सभायां कार्यक्रमस्य सज्जतायाः समीक्षा कृता तथा च अधिकाधिकेभ्यः कृषकेभ्यः योजनायाः अस्याः लाभः प्रयच्छेत् इति सुनिश्चितम् अभवत् । अस्य कार्यक्रमस्य शुभारम्भः उत्तरप्रदेशस्य वाराणसीजनपदे प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भविष्यति। सभायां, श्री. चौहानः राष्ट्रिय-राज्य-मण्डल-ग्राम-स्तराणां कृषकान् अनेन कार्यक्रमेण योजयितुं अधिकारिभ्यः निर्देशं दत्तवान्।

# केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानः सितम्बरमासे हिमाचलम् आगमिष्यति शिक्षामंत्री रोहितठाकुरः आमन्त्रितवान्



**हिमसंस्कृतवार्ताः - शिमला।** शिक्षामन्त्री रोहितठाकुरः नवदेहल्यां केन्द्रीयशिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन सह मिलित्वा हिमाचलस्य दर्शनार्थम् आमन्त्रितवान्। केन्द्रीयशिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन शिक्षामन्त्रिणः निमन्त्रणं स्वीकृतम्। केन्द्रीयमन्त्री सितम्बरमासे हिमाचलस्य भ्रमणं कर्तुं निश्चितः अस्ति। अस्मिन् काले सः हिमाचले प्रचलितानि विविधानि शैक्षणिककार्याणि अवलोकयिष्यति। शिक्षामन्त्री रोहितठाकुरः राज्यस्य शिक्षाक्षेत्रे केन्द्रसर्वकारात् अधिकतमं सहकार्यं याचितवान्। हिमाचलप्रदेशस्य भौगोलिकपरिस्थितिः क्षेत्रीयविषमताः च मनसि कृत्वा सः अनेकान् महत्त्वपूर्णान् आग्रहान् उत्थापितवान्। अस्मिन्नवसरे समग्रशिक्षानिदेशकः राजेश शर्मा, उच्चतरशिक्षानिदेशकः डॉ. अमरजीत शर्मा शिक्षामन्त्रिणा साकं उपस्थिताः अभवन्। शिक्षामन्त्री रोहितठाकुरः उत्तरराज्यानां कृते हिमाचले क्षेत्रीयशिक्षासंस्थानस्य स्थापनां कर्तुं केन्द्रीयशिक्षामन्त्रिणः धर्मेन्द्रप्रधानात् आग्रहं कृतवान्। शिक्षामन्त्री राज्यस्य भौगोलिकविषमतां दृष्ट्वा हिमाचले अधिकाः केन्द्रीयविद्यालयाः उद्घाटयितुं आग्रहं कृतवान्। सः अवदत् यत् पर्वतीय-दूरस्थेषु क्षेत्रेषु गुणवत्तापूर्णशिक्षायाः उपलब्धिः सुनिश्चित्य केन्द्रीयविद्यालयानाम् संख्यां वर्धयितुं आवश्यकता अस्ति। एतेन ग्राम्य-दूरस्थक्षेत्रेषु छात्राणां कृते आधुनिकं समग्रं च शिक्षां प्राप्तुं अवसरः प्राप्यते।

## मध्याह्नभोजनकार्यकर्तृणां मानदं वर्धयितुं पोषणयोजनायाम् अतिरिक्तनिधिं दातुं च आग्रहः

शिक्षामन्त्री मध्यदिवसभोजनयोजनायां कार्यरतानाम् कार्यकर्तृणां सहायकानां च मानदं वर्धयितुम् अपि आग्रहं कृतवान्। सम्प्रति हिमाचलम् स्वनिधितः तेभ्यः अतिरिक्तं मानदं ददाति। एतेन सह सः विद्यालयपोषणयोजनायाः अन्तर्गतं अधिकबजटविनियोगस्य आवश्यकतायाः उपरि बलं दत्तवान्। एतेन विद्यालयस्य बालकाः अपि उत्तमं पौष्टिकं च भोजनं प्राप्नुयुः, येन पोषणस्तरः विकसितः भवति। शिक्षामन्त्री रोहितठाकुरः अपि हिमाचलस्य आदिवासी-आकांक्षि- जनपदेषु छात्राणां छात्रावासस्थापनस्य विषयं केन्द्रीयमन्त्रिणः समक्षं स्थापितवान्। एतेषां क्षेत्राणां भौगोलिकस्थितिं दृष्ट्वा छात्रावासस्य अधिका आवश्यकता वर्तते इति सः अवदत्। केन्द्रसर्वकारस्य साहाय्येन छात्रावासनिर्माणेन छात्राणां कृते सुरक्षितं, सुसज्जितं आवासीयवातावरणं प्रदास्यति, येन तेषां शिक्षायां निरन्तरता भविष्यति, परिणामेषु परिष्कारः भविष्यति।

## केन्द्रीय- उच्चशिक्षासचिवेन विनीतजोशीवर्येण मिलित्वा महाविद्यालयानां सुदृढीकरणाय निवेदनम्

शिक्षामन्त्री रोहितठाकुरः भारतसर्वकारस्य उच्चशिक्षाविभागस्य सचिवः यूजीसी-संस्थायाः कार्यवाहकाध्यक्षः च विनीतजोशीं नवीदिल्लीनगरे अपि मिलितवान्। अस्मिन् अवसरे सः राज्यस्य कृते उच्चशिक्षाक्षेत्रे आवश्यकप्रस्तावानां विषये औपचारिकपत्रं प्रस्तुतवान्। समागमे रोहितठाकुरः अवदत् यत् राज्यस्य भौगोलिकस्थितौ अधिकसंख्यायां महाविद्यालयान् सुदृढं कृत्वा ग्रामीण-पृष्ठक्षेत्रेषु समावेशी-समतापूर्ण-शिक्षा-विकासं प्रवर्तयितुं शक्यते। सः अनुरोधं कृतवान् यत् केन्द्रसर्वकारस्य “रूसा/ पीएम- उषा” इति योजनायाः अन्तर्गतं प्रस्तावितायाः परियोजना-अनुमोदनमण्डलस्य (PAB) गोष्ठ्यां हिमाचलप्रदेशस्य द्वयोः महत्त्वपूर्णयोः याचनयोः विचारः भवेत्। प्रथमयाचनायाः अन्तर्गतं "महाविद्यालयानां सशक्तिकरणम्" घटके न्यूनातिन्यूनं २० अतिरिक्तमहाविद्यालयाः समाविष्टाः भवेयुः, तेषां कृते अनुदानं च प्रदातव्यम्। द्वितीय-याचनायाः अन्तर्गतं "लैङ्गिकसमावेशः समानता च उपक्रमः" इति घटकस्य अन्तर्गतं शिमला-मण्डी-मण्डलयोः समावेशः करणीयः इति अनुरोधः कृतः। एतदतिरिक्तम् अनुसूचितजातिछात्राणां कृते केन्द्रप्रायोजितायाः मैट्रिकोत्तर- छात्रवृत्तियोजनायाः अन्तर्गतं हिमाचलप्रदेशस्य कृते वित्तीयसहायतायाः वित्तपोषणप्रकारे परिवर्तनस्य अपि आग्रहं कृतवान्। शिक्षामन्त्री उक्तवान् यत् वर्तमानस्य ६०:४० (केन्द्रम्: राज्यस्य) वित्तपोषणव्यवस्था हिमालयस्य राज्यानां पङ्क्तौ ९०:१० (केन्द्रम्: राज्यम्) इति परिवर्तनं करणीयम्, येन राज्यस्य छात्राः अधिकं लाभं प्राप्तुं शक्नुवन्ति। एतेन राज्ये उच्चशिक्षायाः स्तरस्य उपलब्धेः च सकारात्मकपरिष्कारः भविष्यति इति शिक्षामन्त्री आशां कृतवान्।

## स्टार्स-परियोजनायाः लम्बितदेयताविमोचनार्थं परियोजनायाः विस्ताराय अनुरोधः

अस्मिन्नवसरे शिक्षामन्त्री केन्द्रीयविद्यालयस्य शिक्षाविभागस्य सचिवः संजयकुमारः, संयुक्तसचिवः अर्चना अवस्थी, संयुक्तसचिवः प्राचीपाण्डे, उपसचिवः लिंगराजः पाण्डा इत्येतैः सह मिलित्वा विद्यालयशिक्षा- सम्बद्धविषयेषु विस्तरेण चर्चा कृतवान्। शिक्षामन्त्री विश्वबैङ्कवित्तपोषितस्य STARS (Strengthening Teaching Learning and Results for States) परियोजनायाः लम्बितनिधिं शीघ्रं विमोचयितुम् अस्याः परियोजनायाः विस्तारं कर्तुम् आग्रहं कृतवान्। शिक्षणाधिगमस्य गुणवत्तां, योग्यताधारितं मूल्याङ्कनं, अङ्कीयसंसाधनानाम् प्रचारार्थं च एषा परियोजना अतीवमहत्त्वपूर्णा अस्ति। शिक्षामन्त्री रोहितठाकुरः केन्द्रस्य उल्लास (ULLAS) समाजस्य सर्वेषां कृते आजीवनशिक्षणं अवगन्तुम् (Understanding Lifelong Learning for All in Society) योजनायाः अन्तर्गतं हिमाचलं 'साक्षरराज्यम्' इति घोषयितुं आग्रहं कृतवान्।

# Himachal Weather- भूस्खलनेन राज्ये २९१ मार्गाः अवरुद्धाः, अनेकेषु भागेषु सप्तदिनानि यावत् प्रचण्डवृष्टेः सचेतना





**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**

हिमाचलप्रदेशस्य अनेकेषु भागेषु वृष्टिः निरन्तरं वर्तते। वर्षर्तौ भूस्खलनेन, आकस्मिकजलप्रलयेन च जीवनं प्रभावितम् अस्ति। गुरुवासरस्य सायं यावत् राज्ये राष्ट्रियराजमार्गसहिताः २९१ मार्गाः अवरुद्धाः एव आसन्। ४१६ विद्युत् परिवर्तकाः २१९ जलापूर्तियोजनाः अपि प्रभाविताः सन्ति। आपदाग्रस्तस्य मण्डीमण्डलस्य अद्यापि अधिकतमं १७१ मार्गाः अवरुद्धाः सन्ति। कुल्लूमण्डले १७४ विद्युत्परिवर्तकाः चम्बायां १३२ च अवरुद्धाः सन्ति। काङ्गड़ामण्डलस्य धर्मशाला- नूरपुर- उपमण्डलेषु १३४ जलापूर्तियोजनाः प्रभाविताः सन्ति।

ऋतुविज्ञानकेन्द्रशिमला इत्यनेन पूर्वानुमानं कृतं यत् राज्यस्य अनेकेषु भागेषु अगस्तमासस्य ६ दिनाङ्कपर्यन्तं वर्षाकालः निरन्तरं भविष्यति। अस्मिन् काले केषुचित् स्थानेषु अत्यधिकवृष्टेः पीतसचेतना कृता अस्ति। शिमलायामपि अद्यत्वे वातावरणं प्रतिकूलमेव अस्ति।

## यदा भूस्खलनेन मार्गः निरुद्धः तदा युवकः द्विचक्रिकाम् स्कन्धे आदाय पारं नीतवान्

भूस्खलनेन चुराह- उपमण्डलस्य नकरोड़- चांजू मार्गः नरेड़नालासमीपे अवरुद्धः अस्ति। चान्जुतः नकरोडं प्रति आगच्छन् द्विचक्रिकायानं अपि तत्र अटत्। बहुकालं प्रतीक्षमाणः द्विचक्रिकायाः चालकः बाहुबली इव द्विचक्रिकाम् स्कन्धे आदाय शिलयोः मध्ये मार्गं लङ्घ्य परं नीतवान्। किञ्चित्कालं विश्रामं कृत्वा असौ द्विचक्रिकायाः आरम्भं कृत्वा गन्तव्यस्थानं प्रति प्रस्थितवान्।

## सलूनी-क्षेत्रस्य टिक्करग्रामे भूस्खलनेन गृहं क्षतिग्रस्तम्

अत्यधिकवृष्टेः कारणात् चम्बाजनपदस्य सलूणीतहसीलस्य ग्रामपंचायतकरवालस्य टिक्करग्रामस्य शिवोदेव्याः नवनिर्मितं गृहं भूस्खलनेन पूर्णरूपेण क्षतिग्रस्तं जातम्। सूचनानुसारं परिवारः अतीव दरिद्रः अस्ति तथा च एतत् गृहं सर्वकाराद् अपि प्राप्तम् यत् नष्टम् अभवत्। नवगृहं तस्याः नेत्रयोः पुरतः भूमौ ध्वस्तम् अभवत्।

## मानसूने एतावता १,७६६ मृत्तिका-बज्रचूर्णगृहाणि क्षतिग्रस्तानि

अस्मिन् मानसूनर्तौ २० जूनतः ३१ जुलाईपर्यन्तं राज्ये १७३ जनाः प्राणान् त्यक्तवन्तः। २८१ जनाः घातिताः सन्ति। अद्यापि ३६ जनाः अदृश्याः सन्ति। अस्मिन् काले मार्गदुर्घटनासु ७८ जनाः मृताः। मेघविस्फोटस्य, भूस्खलनस्य, जलप्लावनस्य कारणेन अद्यावधि १,७६६ मृत्तिका- बज्रचूर्ण- निर्मितगृहाणि, आपणानि च क्षतिग्रस्तानि सन्ति। १,३१३ गोशालाः अपि क्षतिग्रस्ताः सन्ति। १,४१० गृहपशवः मृताः सन्ति। कुलहानिः १,६२,६१९.८९ लक्षरूप्यकाणि प्राप्तवती अस्ति।

## स्त्रियः परस्परं हस्तं धारयित्वा अतिप्रवाहितनालिकां लङ्घयन्ति स्म

कुल्लूमण्डलस्य बञ्जार-उपमण्डलस्य टीपूधार- थानचेड़- चनौनमार्गे जनाः स्वजीवनं संकटापन्नं कृत्वा नालिकां पारं कुर्वन्ति। वर्षायाः अनन्तरं एषा नालिका अतिप्रवाहिता अस्ति। गुरुवासरे दुग्धम् आनयन्तीः महिलाः परस्परं हस्तं धारयित्वा नालिकां लङ्घितवत्यः।

# हि.प्र.मन्त्रिमण्डलस्य निर्णयाः-मानसूनसत्रस्य तिथयः निर्धारिताः,

## आशा कार्यकर्तॄणां २९० पदानि पूरयितुं अनुमोदनम्, टीजीटी तथा जेबीटी पदानां कृते अभ्यर्थिभ्यः उच्च-आयुसीमायां शिथिलता

**हिमसंस्कृतवार्ताः- शिमला।** गुरुवासरे हिमाचलप्रदेशमन्त्रिमण्डलस्य गोष्ठी मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः अध्यक्षतायां सम्पन्ना। चतुर्थदिनं यावत् आयोजिते समागमे बहवः बृहत्निर्णयाः कृताः सन्ति। राज्ये लॉटरीयोजनां पुनः उद्घाटयितुं मन्त्रिमण्डलेन अनुमोदनं कृतम्। अनेन राज्यस्य आयः वर्धते। मन्त्रिमण्डलस्य मन्त्री हर्षवर्धनचौहानः, विक्रमादित्यसिंहः च मन्त्रिमण्डलस्य निर्णयानां विषये सूचनां दत्तवन्तौ। दूरस्थेषु आदिवासीक्षेत्रेषु च स्वास्थ्यसेवासु सुदृढीकरणाय मन्त्रिमण्डलेन २९० अतिरिक्तानाम् आशाकर्मचारिणां नियुक्तौ अपि अनुमोदनं कृतम्, येन एतेषु क्षेत्रेषु आवश्यकस्वास्थ्यसेवासु उत्तमपरिचयः सुनिश्चितः भविष्यति।

### राज्यपालः ९५ लक्षरूप्यकाणां मर्सिडीजबेन्ज्कारयानं प्राप्स्यति

आपदि ये प्रभाविताः जनाः निराश्रयाः अभवन् तेषां कृते ग्राम्यक्षेत्रेषु पञ्चसहस्ररूप्यकाणि, नगरक्षेत्रेषु १० सहस्ररूप्यकाणि च भाटकगृहे निवसितुं दत्तानि भविष्यन्ति। एषा योजना २०२६ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कपर्यन्तं प्रवर्तते। मन्त्रिमण्डलेन राज्यपालस्य कृते ९५ लक्षरूप्यकाणां मर्सिडीजबेन्जकारयानस्य क्रयणमपि अनुमोदितम्। यतः विद्यमानं वाहनं नियमानुसारं परिवर्तनीयम् अस्ति। सभायां मुख्यमन्त्रिणः अध्यक्षतायां पर्यटननिवेशप्रवर्धनपरिषदः स्थापनायाः अनुमोदनं कृतं यत् ५० कोटिरूप्यकाधिकनिवेशयुक्तानां परियोजनानां विचारः करणीयः। परिषद् ३० दिवसेषु विषयेषु निराकरणं करिष्यति।

### नगरीयनिकायनिर्वाचनेषु ओबीसी आरक्षणं कार्यान्वितं भविष्यति

अधुना जलशक्तिविभागः सोलनस्य, पालमपुरनगरपरिषदः च जलबिलानि निर्गमिष्यति। आगामिषु नगरीयस्थानीय- निकायनिर्वाचने ओबीसी-आरक्षणस्य कार्यान्वयनस्य निर्णयः अभवत्। अस्य कृते आरक्षणसूचीम् अन्तिमरूपेण निर्धारयितुं पूर्वं पृष्ठवर्गाणां जनसंख्यायाः सटीकदत्तांशसङ्ग्रहार्थं पृष्ठवर्गायोगस्य सङ्घटनस्य अपि अनुमोदनं कृतम्। मन्त्रिमण्डलेन राज्यपालस्य अनुशंसा कृता यत् हिमाचलप्रदेशस्य विधानसभायाः मानसूनसत्रं १८ अगस्ततः २ सितम्बर् पर्यन्तं आहूतव्यम्। तस्मिन् १२ सभाः भविष्यन्ति। एतादृशं दीर्घं सत्रं स्थापितं यत् सदस्याः स्वक्षेत्रे आपदः हानिः विषये स्वस्य अभिप्रायं स्थापयितुं शक्नुवन्ति।

### टीजीटी तथा जेबीटी पदानां कृते अभ्यर्थिभ्यः उच्च-आयुसीमायां शिथिलता

सभायां हिमाचलप्रदेशराज्यचयन-आयोगेन विज्ञापितेषु टीजीटी-जेबीटी-पदेषु प्रतियोगीपरीक्षायां उपस्थितानां अभ्यर्थीनां कृते उच्च-आयु-सीमायां द्विवर्षस्य एकवारं शिथिलता अपि प्रदत्ता। अनाथबालानां कृते आईटीआई, पॉलिटेक्निक, अभियांत्रिकी, फार्मेसी महाविद्यालयसहितेषु सर्वेषु सर्वकारीयसहायताप्राप्तनिजीतकनीकीसंस्थासु प्रतिपाठ्यक्रमं एकम् आसनम् आरक्षितं कर्तुं मन्त्रिमण्डलेन निर्णयः कृतः।



### आपदा-प्रभावितेभ्यः भाटकसहायतां दातुं अनुमोदनम्

राज्ये प्रचलति मानसूनकाले प्रचण्डवृष्ट्या व्यापकविनाशं दृष्ट्वा आश्रयशिबिरेषु निवसतां प्रभावितपरिवाराणां भाटकसहायतायाः रूपेण आर्थिकसहायतां दातुं मन्त्रिमण्डलेन अनुमोदनं कृतम्। प्रत्यक्षलाभहस्तांतरणद्वारा (डीबीटी) अधिकतमं षण्मासपर्यन्तं ग्राम्यक्षेत्रेषु प्रतिमासं ५,००० रुप्यकाणां दरेन, नगरक्षेत्रेषु १०,००० रुप्यकाणां दरेन भाटकसहायतां प्राप्स्यति। मण्डीसदरक्षेत्रे २२ तः २५ यावत् गृहाणि क्षतिग्रस्तानि इति मन्त्री विक्रमादित्यसिंहः अवदत्। प्रभावितजनानाम् प्रति सर्वकारः सहानुभूतिम् अनुभवति।

### आसवनी, द्रव- धारण- पात्र- प्रक्रिया, मद्यनिर्माणकेन्द्रेषु गृहरक्षकाः नियोजिताः भविष्यन्ति

निर्माण-एककेषु अवैध-क्रियाकलापानाम् निवारणाय मन्त्रिमण्डलेन आसवनी, द्रव- धारण- पात्र- प्रक्रिया- मद्यनिर्माण- संस्थानेषु प्रत्येकं द्वौ गृहरक्षकौ नियोक्तुं निर्णयः कृतः अपि च, एतादृशे प्रत्येकस्मिन् संयन्त्रे एकस्य राज्यकर- आबकारी- अधिकारिणः नियुक्तिः अपि अनुमोदिता, यस्य निश्चितकालानन्तरं तस्मिन् एव मण्डले अनिवार्यं परिवर्तनं भविष्यति। मन्त्रिमण्डलेन काङ्गड़ामण्डले १० लघुखनिजखननानां निविदायै, बिलासपुरमण्डले एतादृशानां ११ खननानां पुनः निविदायै च अनुमोदनं कृतम्। एतेन राज्यस्य कोषे १८.८२ कोटिरूप्यकाणां राजस्वं प्राप्तुं शक्यते, तथैव प्रत्यक्षं परोक्षं च जीविकायाः अवसराः सृज्यन्ते, अवैधखननस्य निवारणे च सहायता भविष्यति।

### एतानि पदानि पूरयितुम् अनुमोदनम्

मन्त्रिमण्डलेन हिमाचलप्रदेशसचिवालये विधिपदाधिकारी (अङ्ग्रेजी) पञ्च, विधिपदाधिकारी (हिन्दी) इति पदद्वयं पूरयितुं निर्णयः कृतः। तदतिरिक्तं भरमौरः, पाङ्गी, स्पीतिः इत्यत्र स्थितस्य एकीकृत- जनजातीयविकास- परियोजनायाः कार्यालयेषु शोधपदाधिकारिणां त्रयाणां पदानाम् निर्माणाय, पूरणाय च मन्त्रिमण्डलेन अनुमोदनं कृतम्। निःशुल्कं वा अपकर्षं वा यात्रासुविधां सुव्यवस्थितं कर्तुं निरीक्षणं च कर्तुं मन्त्रिमण्डलेन हिमाचलमार्गपरिवहननिगमस्य (एचआरटीसी) पात्रलाभार्थिभ्यः हिम् बसकार्ड् निर्गन्तुं अनुमोदनं कृतम्।

### सद्भावना-विरासत-प्रकरणं समाधानयोजना अनुमोदिता

सभायां हिमाचलप्रदेशस्य सद्भावना- विरासत- प्रकरणनिराकरणयोजनायाः द्वितीयचरणस्य आरम्भः १ सितम्बर् २०२५ तः त्रिमासान् यावत् कर्तुं निर्णयः कृतः, यस्य उद्देश्यं प्रायः ३०,००० लंबितप्रकरणानाम् समाधानं भवति। योजनायां वित्तीयवर्ष 2020-21 पर्यन्तं पेट्रोलियम- उत्पादानाम् राज्यमूल्यवर्धितकर- सम्बद्धाः प्रकरणाः अपि समाविष्टाः भविष्यन्ति। अपञ्जीकृत- निर्माणसाधनवाहनानां नियमितीकरणाय एकवारं उत्तराधिकारनीतिम् अपि मन्त्रिमण्डलेन अनुमोदितम्। अस्याः नीतेः अन्तर्गतं स्वामिनः प्रयोज्यस्य एकमुष्टकरस्य, देयस्य दण्डस्य च ५० प्रतिशतं एकमुष्टि-निस्तारणं कृत्वा स्व-वाहनानां पञ्जीकरणं कर्तुं शक्नुवन्ति। एषा नीतिः सूचनादिनाङ्कात् मासत्रयं यावत् प्रभावी भविष्यति। अनुमानानुसारं राज्ये २७९५ ऋण-भंग वाहनानि सन्ति येषां लाभः अस्य उपक्रमस्य लाभं प्राप्तुं शक्नोति।

### रिक्तसर्वकारीयभवनानाम् उपयोगः भविष्यति

अप्रयुक्तानां रिक्तसर्वकारीयभवनानां इष्टतमप्रयोगस्य विषये परामर्शं दातुं तकनीकीशिक्षामन्त्री राजेशधर्माणी इत्यस्य नेतृत्वे मन्त्रिमण्डलस्य उपसमित्याः अनुशंसानाम् अनुमोदनं कर्तुं मन्त्रिमण्डलेन अपि निर्णयः कृतः। समित्या अनुशंसितं यत् विभिन्नविभागानाम् सर्वाणि रिक्तसर्वकारीयभवनानि चरणबद्धरूपेण उपयोक्तुं शक्यन्ते। एतदतिरिक्तं येषां सर्वकारीयविभागानां बोर्डानां, निगमानां च कार्यालयस्थापनार्थं स्थानस्य आवश्यकता वर्तते, तेभ्यः स्थानं प्रदातुं नोडल एजेन्सी इत्यस्य नामाङ्कनम् अपि अनुशंसितम्।

## राजकीय-उच्च-विद्यालय-सिरमौरीताल इत्यत्र श्री विजय-ठाकुर-द्वारा सर्वेभ्यः छात्रेभ्यः व्यायामवस्त्राणि वितरितानि

हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।राजकीय-उच्च-विद्यालय-सिरमौरीताल इत्यत्र दीद-बगड़-ग्रामपंचायतस्य प्रधानेन श्री विजयठाकुरेण सर्वेभ्यः छात्रेभ्यः व्यायामवस्त्राणि वितरितानि । अस्मिन् अवसरे तेन सह श्री सुरेन्द्र ठाकुरः पूर्व उप प्रधानः पनारः , राजकुमारठाकुरः नंबरदारः, यशपालठाकुरः, सुरेन्द्रठाकुरः , तथा राजकीय-उच्च-विद्यालय-सिरमौरीतालस्य अध्यापकाः दिनेशकुमारः(टीजीटी), आचार्य देवेन्द्रशर्मा, , शारीरिकाध्यापकः खुशीराम बंसलः , श्रीमती सुनंदा किरण, ,श्रीमती रिंकी देवी, श्रीमती विजया, श्रीमती किरण देवी, तथा विद्यालय-प्रबन्धन-समितेः अध्यक्षः रमेशकुमारः, संतरामः, विद्यालय-प्रबन्धन-समितेः सदस्याः च उपस्थिताः आसन् । विद्यालयपरिवारपक्षतः आचार्य देवेन्द्रशर्मा-वर्येण विजयठाकुरस्य धन्यवादं कृतम् ।




# संस्कृतसप्ताहस्य उपलक्ष्ये सूरतनगरे त्रिदिवसीयं योजनासमित्याः गोष्ठी जाता



**हिमसंस्कृतवार्ताः- जगदीश डाभी,** (सूर्यपुरात्, गुजरातम्) प्राप्तवार्तानुसारं जुलाई मासस्य ३१-दिनांके माननीयः ए. पी. गोहिलस्य अध्यक्षतायां त्रिदिवसीयसंस्कृतसप्ताहस्य विषये जिलाधीशकार्यालये सभायाः आयोजनम् अभवत्। यस्मिन् अगस्तमासे संस्कृतगौरवयात्रा ६/८/२०२५ दिनाङ्के भविष्यति। अस्मिन् यात्रायां विभिन्नाः विद्यालयाः, महाशालायाः च छात्राः संस्कृतस्य प्रचारार्थं, विविधवेषधारणं करिष्यन्ति। संस्कृते रासगरबा, गीतानि च अपि प्रस्तुतं भविष्यति। सुरतजिलाप्रशासनेन नागरिकान् सम्पूर्णयात्रया सह सम्मिलितुं आह्वानं कृतम्। ६/८/२०२५ दिनाङ्के यात्रास्थाने संस्कृतप्रदर्शनी, संस्कृतपुस्तकप्रदर्शनी, विविधाः चित्रात्मकप्रस्तुतयः च प्रस्तुताः भविष्यन्ति। अपि च संस्कृतश्लोकगानप्रतियोगिता, स्तोत्रगायनप्रतियोगिता, वाक्पटुताप्रतियोगिता इत्यादयः विविधाः स्पर्धाः सम्प्रतिः प्राथमिकमाध्यमिकविद्यालयेषु ६ तः ८ पर्यन्तं ९ तः १२ पर्यन्तं च कक्षायाः आयोजनं भवति। संस्कृतसप्ताहपर्यन्तं ६/८/२५ दिनाङ्के संस्कृतगौरवयात्रा, ७/८/२५ दिनाङ्के संस्कृतसंभाषणदिवसः, ८/८/२०२५ दिनाङ्के संस्कृतसाहित्यदिवसः प्रदर्शनरूपेण आयोज्यते। सम्पूर्णयात्रायाः उद्देश्यं राष्ट्रियशिक्षानीतिः २०२० अन्तर्गतं माध्यमिक-उच्चमाध्यमिकस्तरपर्यन्तं संस्कृतभाषां मुख्यधारायाम् अनिवार्यविषयं करणीयम्। अस्याः यात्रायाः उद्देश्यं गुजरातसर्वकारेण संस्कृतमण्डलेन च योजनापञ्चकमस्य लाभस्य सन्देशं छात्राणां प्रतिगृहं च प्रसारयितुं वर्तते।

# गोस्वामी तुलसीदासः



यस्य मुखे सदा नाम
रामायण कथा तथा।
रचिता रामभक्तेभ्यः
रामकथा मनोरमा।।

गुरुमुखात्तया शृत्वा
रामस्य चरितं सदा।
रचितं मानसं रुच्यं
पुण्यदमवधीगिरि।।

स्वामीना रचितं काव्यं
स्तुतिर्हनुमतस्तथा।
प्रतिदिनं पठन्त्येव
प्रीत्या गृहे गृहे जनाः।।

पाठं सुन्दरकाण्डस्य
शतकेभ्यश्च जायते।
बहुभाषामनीषिनं
रामभक्तंनम्यामहम्।

वाल्मीकेरवतारं वै
तं मन्यन्ते जनाः सदा।
जितेन्द्रियश्च गोस्वामी
गोस्वामिनं नम्यामहम्।।

✍दीक्षितमानसी।

# नाभा-नगरस्य बाङ्के बिहारी मन्दिरे

## श्रीमद्भगवद्गीता - शिक्षण - केन्द्रस्य आरम्भः

पटियाला ॥जुलाई 31, नाभा-नगरस्य बाङ्के बिहारी मन्दिरे ( दुलद्दी गेट) संस्कृतभारतीद्वारा आयोजितस्य श्रीमद्भगवद्गीता - शिक्षण - केन्द्रस्य आरम्भः सञ्जातः ।कार्यक्रमे अस्मिन् सामाजिकान् गीतामाध्यमेन संस्कृतस्य शिक्षणं प्रदास्यते । येन ते गीतायाः मूलम् अर्थम् अवगमनयोग्याः भवेयुः । अस्मिन् उद्घाटनसत्रे मन्दिरस्य अर्चकेन सुरेशमहोदयेन आगतस्य विस्तारकमनीषस्य परिचयः कारितः। प्रथमदीवसीयायां कक्षायां २४ छात्राः समागताः । अस्मिन् अवसरे पारसः, सुशीलः, विक्रान्तः , भीष्मादयः संस्कृतानुरागिणः समुपस्थिताः आसन् ।



# "लौकिकन्यायकोशः"

## "चन्दनगुणन्यायः"

मलयपर्वते चन्दनवृक्षाः बाहुल्येन भवन्ति इति प्रसिद्धिः। एतेषां चन्दनवृक्षाणां कारणात् तत्र वर्तमानेषु निम्बादिवृक्षेष्वपि सुगन्धः भासते इत्यपि लोकश्रुतिः। सज्जनपुरुषाणां संगत्या दुर्जनस्य लाभो भवतीति अनेन न्यायेन बोध्यते। यथा-

**किं तेन हेमगिरिणा रजताद्रिणा वा,**
**यत्राश्रिताश्च तरवस्तरवस्त एव।**
**मन्यामहे मलयमेव यदाश्रयेण,**
**कङ्कोलनिम्बकुटजा अपि चन्दना स्युः।।**

{भर्तृहरिः- २-७८}

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्

## प्रधानमन्त्रिणा नरेन्द्र-मोदिना संयुक्त-अरब-अमीरात इत्यस्य राष्ट्रपतिना शेख-मोहम्मद-बिन-जायद-अल-नाहयान इत्यनेन सह दूरभाषयन्त्रेण सम्वादः कृतः

हिमसंस्कृतवार्ताः - प्रधानमन्त्रिणा नरेन्द्र-मोदिना संयुक्त-अरब-अमीरात इत्यस्य राष्ट्रपतिना शेख-मोहम्मद-बिन-जायद-अल-नाहयान इत्यनेन सह दूरभाषयन्त्रेण सम्वादः कृतः । एकस्मिन् वक्तव्ये, प्रधानमन्त्री-कार्यालयः अवदत् यत् उभौ नेतारौ भारत-यू. ए. ई. देशयोः मध्ये द्विपाक्षिक-व्यापक-सामरिक-सहभागित्वस्य सुदृढीकरणाय परस्पर-प्रतिवद्धतां पुनः सुदृढीकृतवन्तौ । सः अवदत् यत् तौ द्विपाक्षिकसहयोगस्य विविधक्षेत्रेषु कृतानां उल्लेखनीयप्रगतीनां सकारात्मकरूपेण मूल्याङ्कनं कृतवन्तौ अपि च द्वयोः देशयोः जनानां परस्पर-लाभाय सहयोगं विकसितुं, सुदृढं कर्तुं च बलं प्रायच्छताम् ।

# संस्कृतवार्ताः संवादः




**काव्या**- अद्यतन्याम् अध्येता इत्यस्य वार्ताप्रस्तुतौ सर्वेषां स्वागतं करोमि।

**नन्दिनी**- भोः काव्ये, काः अपि अद्यतन्याः वार्ताः पठिताः किं त्वया?

**काव्या**- हे नन्दिनि, यूक्रेनविषयिणीं नूतनां वार्तां ज्ञातवती किम्?

**नन्दिनी**- रूसदेशस्य अन्तः गहनं प्रविष्टानां ड्रोन- आक्रमणानां विषये वदसि किम्? अथवा पश्चिमदेशेषु अधिकोन्नत- शस्त्राणां प्रेषण-विवादस्य विषये?

**काव्या**- उभयमपि। युद्धस्य स्वरूपं पुनः परिवर्तते इति भाति मम। यूक्रेनः हिमागमात् पूर्वं निर्णायक-विजयार्थम् अधिकं साहसिकः व्याकुलश्च भवति, पश्चिमदेशाश्च सङ्कोचं कुर्वन्ति। अहम् आर्थिक-दुष्परिणामेषु एकं लेखं पठितवती। यूरोपीय- अर्थव्यवस्थासु यः क्लेशः अस्ति, सः इदानीं स्पष्टं प्रकटीभवति। अयं विषयः केवलं सैन्य-साहाय्यस्य नास्ति, अपि तु राजनैतिक-सङ्कल्पस्य अस्ति। किम् ईदृशी स्थितिः अन्यदेकं वर्षं यावत् स्थास्यति?

**नन्दिनी-** एषः तु यथार्थवादी विचारः। अहं तु मानवीयपक्षं चिन्तयामि। अयं गतिरोधः केवलं प्राणान् नाशयति। भूराजनीतिकदृष्ट्या तु इदम् एकं प्रसिद्धं परोक्षयुद्धम्। अयं प्रसङ्गः मम वार्तासूच्यां द्वितीयं मुख्यं शीर्षकं स्मारयति– अमेरिका- चीनयोः विवादः। त्वया बीजिङ्ग-यात्रानन्तरम् अर्थसचिवायाः येलेन महाभागायाः वचनं श्रुतं किम्?

**काव्या-** आम्, श्रुतवती अहम्। तस्याः वचनस्य सारः एवम्– "सङ्कट-न्यूनता, न तु सम्बन्धविच्छेदः"। इदं तु तद्वचनस्य एकः अलङ्कृतः प्रकारः इति मम भाति– "सैन्य- तन्त्रज्ञान- महाशक्तित्वेन तव रूपान्तरणं निवारयितुम् इच्छामः, किन्तु कृपया अस्मदर्थम् 'आईफोन्स' इत्यस्य निर्माणं कुरु। अस्मभ्यं स्वल्पमूल्यानि वस्तूनि विक्रीणीष्व"। सर्वदा उभयं साधयितुं न शक्यते।

**नन्दिनी-** एवमेव! चीनदेशीयाः च एतत् जानन्ति। ते स्वेषाम् उत्थानस्य निरोधाय इदम् एकं साक्षात् प्रयत्नम् इति मन्यन्ते। एषः एकः अचिन्त्यः सङ्घर्षः अस्ति। लोकस्य द्वे बृहत्तमे अर्थव्यवस्थे मूलतः परस्परसम्बद्धे स्तः, किन्तु तयोः सर्वकारौ परस्परं शत्रुत्वेन पश्यतः। प्रत्येकं व्यापारशुल्कम्, प्रत्येकं तान्त्रिकप्रतिबन्धः, दक्षिण-चीन-समुद्रे प्रत्येकः सैन्य-अभ्यासश्च। एते सर्वे अस्य विशालस्य भयानकस्य च चतुरङ्ग-क्रीडायाः अङ्गभूताः।

**काव्या-** इयं सा क्रीडा या सर्वान् अन्यान् अपि आकर्षति। भारतस्य सन्तुलन-कौशलं पश्य। एकतः सः जी-२०-सम्मेलनम् आयोजयति, सुरक्षा-परिषदि स्थायि-स्थानार्थं प्रयतते, अपरतः सामरिक-स्वातन्त्र्यं रक्षितुम् अपि चेष्टते। वयं रषियादेशात् तैलं तथा अमेरिकादेशात् उन्नत-तन्त्रज्ञानं च क्रीणीमः। इदम् असिधारा-व्रतम् एव।

**नन्दिनी-** एतत् असिधारा- व्रतं तु इतः अपि अधिकं जटिलं जायते। एषः विषयः मां तां वार्तां स्मारयति या मम मतानुसारं पश्चिमदेशेषु अन्यायेन उपेक्षिता अस्ति। साहेलप्रदेशे अस्थिरता। प्रथमं मालीदेशे, ततः बुर्किना फासोदेशे, इदानीं च निजेरदेशे शासनविप्लवः।

**काव्या-** आम्, सः 'शासनविप्लव- मेखला'- प्रदेशः खलु। सम्पदां दृष्ट्या तु एषः दुःस्वप्नः एव। निजेरदेशः यूरेनियमस्य एकः महान् आपूर्तिकर्ता अस्ति, विशेषतः फ्रान्सदेशाय। अस्य युरोपस्य ऊर्जा-सुरक्षायाम् साक्षात् प्रभावः भविष्यति। सा सुरक्षा तु यूक्रेन-युद्धकारणात् पूर्वमेव दुर्बला। सर्वं परस्परसम्बद्धम् अस्ति।

**नन्दिनी-** सत्यम्, किन्तु इयम् उत्तर- उपनिवेशवादस्य वैफल्यस्य कथा अपि अस्ति। तत्र अत्यन्तः फ्रान्स-विरोधी भावः अस्ति, यं भावं रषियादेशस्य 'वाग्नर'-समूहाः कौशलेन स्वार्थे प्रयुञ्जन्ति। यत्र पश्चिमदेशीयाः शक्तयः निष्फलाः अभूवन्, तत्र ते सुरक्षां प्रतिश्रुत्य सहसा प्रविशन्ति, महान्तं प्रभावं च लभन्ते। एकः सम्पूर्णः प्रदेशः पश्चिमदेशेभ्यः विमुखो भूत्वा मोस्को-बीजिङ्ग-दिशं प्रति गच्छति इति वयं पश्यामः। एषः अस्माकं चक्षुषोः समक्षमेव घटमानः महान् भूराजनीतिकः परिवर्तः।

**काव्या-** एवं सति यूरोपे प्रत्यक्षं युद्धम्, प्रशान्त-सागरे शीत-युद्धम्, अफ्रीकायां च प्रभावार्थं छद्म-युद्धम्... तर्हि अद्य प्रलयस्य अग्रिमः प्रसङ्गः कः?

**नन्दिनी-** (ईषत् म्लानं हसित्वा) कृत्रिम-प्रज्ञा। कृत्रिम-प्रज्ञायाः प्रभुत्वाय वैश्विकी स्पर्धा। इदं युद्धस्य शासनविप्लवस्य वा शीर्षकं नास्ति, किन्तु एतत् सर्वेभ्यः अधिकं महत्त्वपूर्णं भवितुम् अर्हति।

**काव्या-** अद्यतन वार्ताप्रस्तुतिः एतावती एव। सर्वेभ्यः शुभं भूयात्। पुनर्मिलामः।